# ಕರ್ನಾಟಕ ಶಾಲಾ ಪರೀಕ್ಷೆ ಮತ್ತು ಮೌಲ್ಯನಿರ್ಣಯ ಮಂಡಲಿ

ಮಲ್ಲೇಶ್ವರಂ, ಬೆಂಗಳೂರು-560003

# KARNATAKA SCHOOL EXAMINATION AND ASSESSMENT BOARD

Malleswaram, Bengaluru-560003

## ಎಸ್.ಎಸ್.ಎಲ್.ಸಿ. ಮಾದರಿ ಪ್ರಶ್ನೆಪತ್ರಿಕೆ 2022-23

## ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ - ಸಂಸ್ಕೃತ

## SUBJECT: First Language - Sanskrit

ಸಮಯ: 3 ಗಂಟೆ 15 ನಿಮಿಷಗಳು

ಗರಿಷ್ಠ ಅಂಕಗಳು : 100

ವಿಷಯ ಸಂಕೇತ: 16S

## CCE-RF

## ಶಾಲಾ ಅಭ್ಯರ್ಥಿಗಳಿಗೆ

---

### ಪರೀಕ್ಷಾರ್ಥಿಗಾಗಿ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ 45 ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ, ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ಕೊಡಲಾಗಿದೆ.

### परीक्षार्थिनां सामान्यसूचना:

1. अस्मिन् प्रश्नपत्रे वस्तुनिष्ठा: विषयनिष्ठाश्च पञ्चचत्वारिंशत् (45) प्रश्ना: सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत । प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति वा इति अवलोकायत ।
3. विषयनिष्ठानां वस्तुनिष्ठानाञ्च प्रश्नानां विषये निर्दिष्टा: नियमा: अनुपालनीया: ।
4. प्रश्नानां प्रति अधिकृता: अङ्का: पार्श्वे लिखिता: सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारित: समयावधि: प्रश्नपत्रस्य उपरि भागे लिखित: अस्ति । पञ्चदशनिमेषा: प्रश्नपत्रस्य पठनार्थं निर्धारिता: सन्ति ।

**I. अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह लिखत ।** **6 × 1 = 6**

1. 'पङ्क्तिरथः' अस्य समानार्थकपदम् इदं भवति ।

(A) दशरथः (B) रामः

(C) लक्ष्मणः (D) सुमन्त्रः

2. 'शिष्टः' अस्य विरुद्धार्थकपदम् इदं भवति ।

(A) अवशिष्टः (B) दुष्टः

(C) सज्जनः (D) शेषः

3. 'महोदया' अत्र एतत् लिङ्गम् अस्ति ।

(A) पुंलिङ्गम् (B) स्त्रीलिङ्गम्

(C) नपुंसकलिङ्गम् (D) त्रिलिङ्गम्

4. 'तिष्ठति' अत्र एषः लकारः वर्तते ।

(A) लट्लकारः (B) लोट्लकारः

(C) लङ्लकारः (D) लृट्लकारः

5. 'उद्यमे' अत्र एषा विभक्तिः भवति ।

(A) प्रथमाविभक्तिः (B) तृतीयाविभक्तिः

(C) पञ्चमीविभक्तिः (D) सप्तमीविभक्तिः

6. एतेषु शुद्धं वाक्यम् एतत् अस्ति ।

(A) बालकस्य मोदकं रोचते (B) बालके मोदकं रोचते

(C) बालकाय मोदकं रोचते (D) बालकं मोदकं रोचते

**II. चतुर्थं पदं लिखत ।** **4 × 1 = 4**

7. विद्वान् – परात्परं पुरुषमुपैति :: नद्यः – ........................।

8. कीर्तिकायः – शिवाजिप्रभुः :: अभयदायिनी – ........................ ।

9. अर्जुनः – धीरोदात्तः :: दुर्योधनः – ........................... ।

10. रष्यादेशः – अणुविकिरणः :: आर्टिक्प्रदेशः – ........................... ।

**III. एकवाक्येन उत्तरं लिखत ।** **7 × 1 = 7**

11. सर्वोऽपि जीवराशिः कस्मात् बलं प्राप्नोति ?

12. बाल्ये डा० सत्यव्रतशास्त्रिमहोदयस्य गृहपरिसरः कथम् आसीत् ?

13. भोजस्य पिता कः ?

14. राजा दशरथः कान् आचख्यौ ?

15. भारतीयभावना निरन्तरं किं ददाति ?

16. उप्तं बीजं केन विना निष्फलं भवति ?

17. रमणमहर्षेः मातापितरौ कौ ?

**IV. द्वित्रैः वाक्यैः उत्तरं लिखत ।** **4 × 2 = 8**

18. बुद्धिसागरः मुञ्जं प्रति किमाह ?

19. सुमन्त्रप्रमुखाः दशरथाय किं व्यजिज्ञपन् ?

20. कीदृशं पुरुषं लक्ष्मीः निवासहेतोः स्वयं याति ?

21. कः आयुर्वेदः उच्यते ?

**V. सूचनानुसारम् उत्तरं लिखत ।** **4 × 2 = 8**

22. सन्धिं विभज्य नाम लिखत ।

a) मुनिरिति ।

b) एतदुपरि ।

23. विग्रहवाक्यं विलिख्य समासनाम लिखत ।

a) प्रतिवर्षम् ।

b) स्वर्गतुल्यः ।

**अथवा**

समासं कृत्वा समासनाम लिखत ।

a) जनानां सेवा =

b) चक्रं पाणौ यस्य सः =

24. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत ।

a) छात्रः अध्येतुं शालां गच्छति ।

b) नगरे शोभमानम् उपवनं भवति ।

[ Turn over

25. प्रयोगपरिवर्तनं कुरुत ।

a) बालकः पाठं पठितवान् ।

b) मया जलं पीयते ।

**VI. संस्कृतभाषया अनुवादं कुरुत ।** **1 × 2 = 2**

26. ಅಧಿಕ ಮಳೆಯ ಕಾರಣದಿಂದ ನದಿಗಳಲ್ಲಿ ಪ್ರವಾಹವು ಉಂಟಾಗುತ್ತದೆ. ಆಗ ಅನೇಕ ಜೀವಹಾನಿಯೂ ಸಂಭವಿಸುತ್ತದೆ.

There are floods in the rivers due to heavy downpour of rain. Then it causes huge destruction also.

**VII. कर्नाटकभाषया, आङ्ग्लभाषया वा अनुवादं कुरुत ।** **1 × 2 = 2**

27. विद्यार्थिजीवनम् अत्यन्तम् अमूल्यं भवति । अतः विद्यार्थी गुरूणां मार्गदर्शनम् अनुसरन् सदा उत्साही भवेत् ।

**VIII. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत ।** **4 × 3 = 12**

28. "सः महर्षिः धर्मात्मा उदारश्च" ।

कः पाठः ? कः अवदत् ? धर्मात्मा कः ?

29. "विज्ञानप्रदर्शिनीं द्रष्टुं गच्छाम ।"

क: पाठः ? कः वदति ? प्रदर्शिनी कुत्र आयोजिता ?

30. "भवानेव संस्कृतेन ग्रन्थान् लिखतु ।"

क: पाठः ? कः अवदत् ? कम् अवदत् ?

**अथवा**

"भवतु, अस्माकं महाराज्ञी अभयदायिनी ।"

क: पाठः ? के अवदन् ? महाराज्ञी का ?

31. "अहमस्य प्रदास्यामि परमं वरमद्भुतम् ।"

क: पाठः ? कः वरं ददाति ? कस्मै वरं ददाति ?

**IX. कवेः देश-काल-कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत ।** **2 × 3 = 6**

32. विद्वान् एच्.वि. नागराजराव् ।

33. वेदव्यासः ।

**X. पद्यपाठस्य नाम उल्लिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।** **3 × 3 = 9**

34. यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति ।

सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ।।

35. यत्र कुत्र वा वयं समग्रभारते स्थिता

भाषयापि धर्मतश्च भिन्नमार्गमाश्रिताः ।

आदितश्च मध्यतस्तथान्ततश्च भारता

भारतीयभावनेति वृद्धिमेतु भारते ।।

36. शिशुरेष त्वदोषज्ञ इति मत्वा दिनेश्वरः ।

कार्यं चात्र समायत्तम् इत्येवं न ददाह सः ।।

**अथवा**

नायिकाश्चैव वक्ष्यामि चतस्रः पुनरेव तु ।

दिव्या च नृपपत्नी च कुलस्त्री गणिका तथा ।।

**XI. वाक्ये विद्यमानम् अलङ्कारं सलक्षणं समन्वयत ।** **1 × 3 = 3**

37. श्रीरामः समुद्रः इव गम्भीरः ।

**अथवा**

गङ्गा गङ्गेव पावनी ।

**XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** **1 × 3 = 3**

38. वनभुवितनुमात्रत्राणमाज्ञापितं मे ।

**XIII. पद्यं पूरयत ।** **1 × 4 = 4**

39. क्षारं जलं ..........................................................................................

..........................................................................................।

..........................................................................................

.......................................................................... समुद्रिरन्ति ।।

**XIV. दशवाक्यैः उत्तरं कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।**

**3 × 4 = 12**

40. कर्णः स्वस्य अस्त्रस्य वृत्तान्तं शल्यं प्रति कथम् अवर्णयत् ?

**अथवा**

किमर्थं मुञ्जः भोजं मारयितुं प्रयतते ?

41. पाठ्यभागे निरूपितान् नाट्यांशान् सङ्गृह्य लिखत ।

42. ध्रुवः ध्रुवपदवीं कथं प्राप्तवान् इति विवृणुत ।

**XV. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** **1 × 4 = 4**

43. प्रपञ्चे प्राचीनतमं साहित्यं वैदिकसाहित्यं वर्तते । वेदशब्दस्य अर्थः ज्ञानम् । ऋषिभिः तपसा साक्षात्कृतः ज्ञानराशिः एव वेदः इति साम्प्रदायिकाः कथयन्ति । वेदाः अपौरुषेयाः । ते चत्वारः सन्ति – ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः चेति । वेदानां विभागं व्यास-महर्षिः अकरोत् । अत एव तस्य वेदव्यासः इति नाम आगतम् । वेदानां सारभूताः भागाः उपनिषदः भवन्ति ।

**प्रश्नाः**

i) प्रपञ्चे प्राचीनतमं साहित्यं किम् ?

ii) वेदशब्दस्य अर्थः कः ?

iii) कति वेदाः सन्ति ?

iv) उपनिषदः केषां सारभूताः भागाः ?

**XVI. पत्रं लिखत ।** **1 × 5 = 5**

44. विजयपुरमण्डलस्य सर्वकारीयप्रौढशालायाः छात्रः/छात्रा इति मत्वा ग्रामस्य उत्सवनिमित्तं दिनत्रयं विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति विरामपत्रं लिखत ।

**अथवा**

शैक्षणिकप्रवासार्थं द्विसहस्रंरूप्यकाणि प्रेषयितुं पितरं प्रति पत्रं लिखत ।

**XVII. दशवाक्यैः प्रबन्धं लिखत ।** **1 × 5 = 5**

45. परिसरमालिन्यम् – तस्य निवारणोपायाः ।

**अथवा**

समाचारपत्रम् ।